षष्ठः पाठः ६

# सर्वनाम-शब्दप्रयोगः

## ( अस्मद्-युष्मद् )

**अहम्/आवाम्/वयम्**



अहं छात्रः।

अहं पठामि।



आवां छात्रौ।

आवां पठावः।



वयं छात्राः।

वयं पठामः।



अहं बालिका।

अहं क्रीडामि।



आवां बालिके।

आवां क्रीडावः।



वयं बालिकाः।

वयं क्रीडामः।

| | | | |
|---|---|---|---|
| १. | अहं भक्तः। | आवां भक्तौ। | वयं भक्ताः। |
| | अहं नमामि। | आवां नमावः। | वयं नमामः। |
| २. | अहं महिला। | आवां महिले। | वयं महिलाः। |
| | अहं पचामि। | आवां पचावः। | वयं पचामः। |
| ३. | अहं लेखकः। | आवां लेखकौ। | वयं लेखकाः। |
| | अहं लिखामि। | आवां लिखावः। | वयं लिखामः। |

## त्वम्/युवाम्/यूयम्





त्वं बालकः।
त्वं पठसि।



युवां बालकौ।
युवां पठथः।



यूयं बालकाः।
यूयं पठथ।



त्वं बालिका।
त्वं क्रीडसि।



युवां बालिके।
युवां क्रीडथः।



यूयं बालिकाः।
यूयं क्रीडथ।

| | | | |
|---|---|---|---|
| १. | त्वं धावक :। | युवां धावकौ। | यूयं धावकाः। |
| | त्वं धावसि। | युवां धावथः। | यूयं धावथ। |
| २. | त्वम् अध्यापिका। | युवाम् अध्यापिके । | यूयम् अध्यापिकाः। |
| | त्वं लिखसि। | युवां लिखथः। | यूयं लिखथ। |
| ३. | त्वं सैनिक :। | युवां सैनिकौ। | यूयं सैनिकाः। |
| | त्वं रक्षसि। | युवां रक्षथः। | यूयं रक्षथ। |

**पश्यत, पठत, अवगच्छत च -**

विद्यालये एषः विशिष्टकार्यस्य कालांशः। अधुना छात्राः विविधानि कार्याणि कुर्वन्ति। अध्यापकः छात्रान् कार्यविषये पृच्छति-



**अध्यापकः** - त्वं किं करोषि?

**छात्रः** - अहं पठामि।

**अध्यापकः** - त्वं किं पठसि?

**छात्रः** - अहं पाठं पठामि।

**अध्यापकः** - उत्तमम्।



**अध्यापकः** - युवां किं कुरुथः?

**छात्रौ** - आवां वृक्षारोपणं कुर्वः।

**अध्यापकः** - एषः कः वृक्षः?

**छात्रौ** - एषः निम्बवृक्षः।

**अध्यापकः** - अत्युत्तमम्।



**अध्यापकः** - यूयं किं कुरुथ?

**छात्राः** - वयं गीतं गायामः।

**अध्यापकः** - यूयं किं गीतं गायथ?

**छात्राः** - वयं संस्कृतगीतं गायामः।

**अध्यापकः** - बहु शोभनम्!

यूयं सम्यक् गीतं गायथ।

## अभ्यासः

**१. मञ्जूषातः उचितम् 'अस्मद्' शब्दरूपं चित्वा रिक्तस्थानानि पूरयत -**

| अहम् , आवाम् , वयम् |
|---|

(क) .................................. श्लोकं लिखामि।

(ख) .................................. पाठं स्मरामः।

(ग) .................................. गीतं गायावः।

(घ) .................................. कन्दुकेन क्रीडामि।

(ङ) .................................. उद्यानं गच्छावः।

**२. मञ्जूषातः युष्मद्-शब्दरूपं चित्वा रिक्तस्थानानि पूरयत -**

| त्वम् , युवाम् , यूयम् |
|---|

(क) .................................. सैनिकः असि।

(ख) .................................. देशं रक्षथ।

(ग) .................................. सैनिकाः स्थ।

(घ) .................................. पाठं पठथ।

(ङ) .................................. गीतं गायथः।

**३. परस्परं सुमेलयत-**

| | |
|---|---|
| त्वम् | खादामि |
| यूयम् | क्रीडावः |
| आवाम् | गच्छथः |
| अहम् | लिखसि |
| युवाम् | रक्षामः |
| वयम् | पचथ |

## ४. वचनपरिवर्तनं कृत्वा रिक्तस्थानानि पूरयत -

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| यथा - अहम् अध्यापक:। | आवाम् अध्यापकौ। | वयम् अध्यापका:। |
| (क) अहं सौचिक:। | ....................। | ....................। |
| (ख) त्वं लेखक:। | ....................। | ....................। |
| (ग) ....................। | युवां भक्तौ। | ....................। |
| (घ) ....................। | ....................। | यूयं सैनिका:। |
| (ङ) ....................। | आवां क्रीडकौ। | ....................। |

## ५. अधोलिखितानि एकवचन-वाक्यानि द्विवचने बहुवचने च लिखत -

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| [ अ ] यथा - त्वं लिखसि। | युवां लिखथ:। | यूयं लिखथ। |
| (क) त्वं क्रीडसि | ....................। | ....................। |
| (ख) त्वं हससि। | ....................। | ....................। |
| (ग) त्वं गच्छसि। | ....................। | ....................। |
| (घ) त्वं खादसि | ....................। | ....................। |
| [ आ ] यथा- अहं पठामि। | आवां पठाव:। | वयं पठाम:। |
| (क) अहं वदामि। | ....................। | ....................। |
| (ख) अहं पचामि। | ....................। | ....................। |
| (ग) अहं धावामि। | ....................। | ....................। |
| (घ) अहम् आगच्छामि। | ....................। | ....................। |

## ६. मञ्जूषायां प्रदत्त-पदानि उचित-स्थाने लिखित्वा संवादं पूरयत -

**[ अ ]**

| त्वं | करोषि | पठामि | पश्यामि | अहं |
|---|---|---|---|---|

**यथा-** भावेशः - त्वं किं करोषि ?

(क) अरुणः - अहं पुस्तकं .................... । त्वं किं.................... ?

(ख) भावेशः - .................... दूरदर्शनं पश्यामि ।

(ग) अरुणः - दूरदर्शने.................... किं पश्यसि ?

(घ) भावेशः - दूरदर्शने अहं हास्यनाटिकां .................... ।

**[ आ ]**

| त्वं | गच्छामि | अहं | गच्छसि |
|---|---|---|---|

(क) मिताली - त्वं कुत्र .................... ?

(ख) आराध्या - अहम् उद्यानं .................... ।

(ग) मिताली - तत्र.................... किं करोषि ?

(घ) आराध्या - तत्र .................... भ्रमामि क्रीडामि च।

## योग्यता-विस्तारः

१. अस्मिन् पाठे 'अस्मद्' शब्दस्य रूपाणि (अहम्, आवाम्, वयम् ) एवञ्च युष्मद्शब्दस्य रूपाणि (त्वम्, युवाम्, यूयम् ) पठितानि । एतानि सर्वाणि प्रथमाविभक्तेः रूपाणि सन्ति । अस्मद्- युष्मद् शब्दौ अपि सर्वनामशब्दौ स्तः ।

२. **संस्कृते त्रयः पुरुषाः भवन्ति -**

१. प्रथमः पुरुषः

२. मध्यमः पुरुषः

३. उत्तमः पुरुषः

३. **प्रथमाविभक्तेः रूपाणि एतेषु त्रिषु पुरुषेषु विभक्तानि भवन्ति -**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | सः | तौ | ते |
| मध्यमः पुरुषः | त्वम् | युवाम् | यूयम् |
| उत्तमः पुरुषः | अहम् | आवाम् | वयम् |

४. **अवधेयम् -** मध्यमपुरुषस्य त्रीणि रूपाणि (त्वम्, युवाम्, यूयम्) एवञ्च उत्तमपुरुषस्य त्रीणि रूपाणि (अहम्, आवाम्, वयम्) विहाय अन्यानि सर्वाणि रूपाणि 'प्रथमपुरुषे' एव भवन्ति।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| एषः | एतौ | एते |
| बालकः | बालकौ | बालकाः |
| एषा | एते | एताः |
| बालिका | बालिके | बालिकाः |
| एतत् | एते | एतानि |
| पुष्पम् | पुष्पे | पुष्पाणि |

इत्यादीनि सर्वाणि रूपाणि प्रथम-पुरुषे एव सन्ति।

५. **क्रिया-रूपाणि अपि त्रिषु पुरुषेषु भवन्ति। यथा - पठ्धातोः रूपाणि पश्यन्तु -**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पठति | पठतः | पठन्ति |
| मध्यमः परुषः | पठसि | पठथः | पठथ |
| उत्तमः पुरुषः | पठामि | पठावः | पठामः |

प्रथमाविभक्तेः रूपं यस्मिन् पुरुषे यस्मिन् वचने च भवति, क्रियायाः रूपम् अपि तस्मिन् एव पुरुषे तस्मिन् एव वचने च भवति ।

यथा –

| बालकः | | पठति | | (बालकः पठति।) |
|---|---|---|---|---|
| प्रथमः पुरुषः | एकवचनम् | प्रथमः पुरुषः | एकवचनम् | |

| त्वम् | | पठसि | | (त्वं पठसि।) |
|---|---|---|---|---|
| मध्यमः पुरुषः | एकवचनम् | मध्यमः पुरुषः | एकवचनम् | |

| अहम् | | पठामि | | (अहं पठामि।) |
|---|---|---|---|---|
| उत्तमः पुरुषः | एकवचनम् | उत्तमः पुरुषः | एकवचनम् | |

**अन्यानि वाक्यानि –**

बालिके नमतः। बालकाः लिखन्ति। मनोजः पश्यति। युवां खादथः।

यूयं क्रीडथ। अहं पिबामि। आवां पठावः। ते गच्छन्ति।

- अनेन एव प्रकारेण इतोऽपि वाक्यानि रचयन्तु।